**दिनाङ्क :-22.03.2024**

**प्रात: - 06:55**

## निर्वाचनायोग-निर्वाचनबन्धानि

निर्वाचनायोग: स्वकीये वेबफलके विशिष्टानुक्रमानुसारं निर्वाचनबन्धानां विवरणं प्रस्तौति। सर्वोच्च न्यायालयस्य आदेशानन्तरं एस.बी.आई. इति वित्तकोशेन केन दलेन कति धनानुबन्धानि प्राप्तानीति प्रकाशितमासीत्। तदनन्तरं निर्वाचनायोगेनापि प्रख्यापितमस्ति यत् धनानुबन्धानां सम्प्राप्ते: विवरणम् अयोगस्य वेबफलके प्रकाश्यते, येन जना: सुगमतया ज्ञातुं प्रभवन्ति यत् केन दलेन कस्मात् कति राशि: सम्प्राप्त:इति। अत्र ध्यातव्यमस्ति यत् केवलं स्टेट बैंक ऑफ इण्डिया इत्याख्य: वित्तकोष: एव प्राधिकृत: अस्ति एतेषां वित्तानुबन्धानां विक्रणाय।

## लोकसभा निर्वाचनम्

लोकसभा निर्वाचनाय प्रथमचरणीय-मतदाने प्रत्याशीभूता: जना: सजवं नामाङ्कनं प्रपूरयन्ति। चरणेऽस्मिन् सप्तदशराज्यानां चतुर्णां केन्द्रशासितप्रदेशानाञ्च द्वयाधिकैक- शत-लोकसभाक्षेत्रेभ्य: मतदानं भविता। केन्द्रीयमन्त्रिणा जितेन्द्रसिंहेन ह्य: अधमपुर-लोकसभायै नामाङ्कनं पूरितम्। अत्र अप्रैल-मासस्य एकोनविंशत्यां मतदानं भविष्यति। निशिथप्रामाणिकेनापि कूचबिहारमण्डलाध्यक्षस्य कार्यालये नामाङ्कनं पूरितम्, सोऽपि साम्प्रतिक: केन्द्रीयमन्त्री अस्ति। अनेनैव प्रकारेण अन्यै: नेतृभि: अपि नामाङ्कनानि पूरितानि।

## इन्द्रावती/हैती

भारतदेश: स्वदेशीयानां जनानां हैतीत: डोमिनिकनगणराज्यं यावत् निर्मुक्तये इन्द्रावती अभियानम् आयोजते। एकस्मिन् आन्तर्जालिक-सन्देश-पटले विदेशमन्त्रिणा डॉ. एस. जयशंकरेण प्रोक्तं यत् द्वादशभारतीया: निष्काषिता: सन्ति, तेनोक्तं यत् भारतदेश: स्वदेशीयानां नागरिकाणां सुरक्षायै सर्वदैव सन्नद्ध: अस्तीति।

## क्जरीवालो निगडित:

दिल्लीति केन्द्रशासितप्रदेशस्य मुख्यमन्त्री अरविन्दकेजरीवाल: मद्यनीति-अनियमितताख्ये भ्राष्टाचारिकप्रकरणे प्रवर्तननिदेशालयेन निगडित:। मुख्यमन्त्रिणा सर्वमपि प्रकरणं अविधिसम्मतं राजनैतिकञ्च अस्तीति उक्त्वा निरस्तीकृतम्। आपाख्यस्य दलस्य नेतृणा आतिशीमारलेना इत्यनया प्रोक्तमस्ति यत् सर्वमपि प्रकरणं विरुध्य दलं सर्वोच्चन्यायालयं प्रति यातीति।

## वियतनाम

वियतनामदेशस्य राष्ट्रपति: वो वैन थुन्ओङ्ग: भ्रष्टाचारस्य आरोपानन्तरं त्यागपत्रं दत्तवान्। तस्य निर्वाचनम् वर्षैकं प्राक् जातासीत्। तस्य त्यागपत्रं-वियतनामदेशस्य कम्युनिस्ट-पार्टी-इत्यनेन स्वीकृतमस्ति। एकस्मिन् वक्तव्ये कम्युनिष्ट-प्रशासनेन

प्रोक्तमस्ति यत् थुन्ओंग इत्यनेन दलस्य नियमाः उल्लंघिताः सन्ति। भ्रष्टाचाराधारेण वर्षद्वये त्यागपत्रदातृभ्यां राष्ट्रपतिभ्यां-थुओङ्गः द्वितीयोऽस्ति।

**<u>क्रीडावार्तायां</u>**

स्विस-ओपन-बैडमिन्टन इति स्पर्धायां जी.गोपीचन्द अथ टी.जॉली इत्येताभ्यां क्रीडिकाभ्यां युगलं प्रागुपान्तचक्रम् प्राविशत्। ह्यः भारतस्य प्रियांशु-राजावतः पुरुषवर्गे अस्यामेव स्पर्धायाम् उपान्तचक्रं प्राविशत्। तेन चीनदेशस्य लक्सी-लेई पराजितः।

**।। इति वार्ताः ।।**